श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ सप्तपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तपञ्चाशः सर्गः ॥

विश्वामित्रस्य तपःकरणं त्रिशङ्कोः स्वीयं यज्ञं कारयितुं वसिष्ठं प्रति प्रार्थना, तेन प्रत्याख्यातेन राज्ञा गुरुपुत्राणां सन्निधिमुपेत्य स्वाभिप्रायस्य निवेदनम्

ततः सन्तप्तहृदयः स्मरन्निग्रहमात्मनः।
विनिःश्वस्य विनिःश्वस्य कृतवैरो महात्मना ॥ **1.57.1** ॥

स दक्षिणां दिशं गत्वा महिष्या सह राघव।
तताप परमं घोरं विश्वामित्रो महातपाः ॥ **1.57.2** ॥

फलमूलाशनो दान्तश्चचार परमं तपः।
अथास्य जज्ञिरे पुत्राः सत्यधर्मपरायणाः ॥ **1.57.3** ॥

हविष्पन्दो मधुष्पन्दो दृढनेत्रो महारथः।
पूर्णे वर्षसहस्रे तु ब्रह्मा लोकपितामहः ॥ **1.57.4** ॥

अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनम्।
जिता राजर्षिलोकास्ते तपसा कुशिकात्मज ॥ **1.57.5** ॥

अनेन तपसा त्वां हि राजर्षिरिति विद्महे।
एवमुक्त्वा महातेजा जगाम सह दैवतैः ॥ **1.57.6** ॥

त्रिविष्टपं ब्रह्मलोकं लोकानां परमेश्वरः।
विश्वामित्रोऽपि तच्छ्रुत्वा ह्रिया किञ्चिदवाङ्मुखः ॥ **1.57.7** ॥

दुःखेन महताविष्टः समन्युरिदमब्रवीत्।
तपश्च सुमहत् तप्तं राजर्षिरिति मां विदुः॥ **1.57.8** ॥

देवाः सर्षिगणाः सर्वे नास्ति मन्ये तपः फलम्।
एवं निश्चित्य मनसा भूय एव महातपाः॥ **1.57.9** ॥

तपश्चचार धर्मात्मा काकुत्स्थ परमात्मवान्।
एतस्मिन्नेव काले तु सत्यवादी जितेन्द्रियः॥ **1.57.10** ॥

त्रिशङ्कुरिति विख्यात इक्ष्वाकुकुलवर्धनः।
तस्य बुद्धिः समुत्पन्ना यजेयमिति राघव॥ **1.57.11** ॥

गच्छेयं स्वशरीरेण देवतानां परां गतिम्।
वसिष्ठं स समाहूय कथयामास चिन्तितम्॥ **1.57.12** ॥

अशक्यमिति चाप्युक्तो वसिष्ठेन महात्मना।
प्रत्याख्यातो वसिष्ठेन स ययौ दक्षिणां दिशम्॥ **1.57.13** ॥

ततस्तत्कर्मसिद्ध्यर्थं पुत्रांस्तस्य गतो नृपः।
वासिष्ठा दीर्घतपसस्तपो यत्र हि तेपिरे॥ **1.57.14** ॥

त्रिशङ्कुस्तु महातेजाः शतं परमभास्वरम्।
वसिष्ठपुत्रान् ददृशे तप्यमानान् मनस्विनः॥ **1.57.15** ॥

सोऽभिगम्य महात्मानः सर्वानेव गुरोः सुतान्।
अभिवाद्यानुपूर्वेण ह्रिया किञ्चिदवाङ्मुखः॥ **1.57.16** ॥

अब्रवीत् स महात्मानः सर्वानेव कृताञ्जलिः।
शरणं वः प्रपन्नोऽहं शरण्याञ्शारणं गतः॥ **1.57.17** ॥

प्रत्याख्यातो हि भद्रं वो वसिष्ठेन महात्मना।
यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ॥ **1.57.18** ॥

गुरुपुत्रानहं सर्वान् नमस्कृत्य प्रसादये।
शिरसा प्रणतो याचे ब्राह्मणांस्तपसि स्थितान्॥ **1.57.19** ॥

ते मां भवन्तः सिद्ध्यर्थं याजयन्तु समाहिताः।
सशरीरो यथाहं वै देवलोकमवाप्नुयाम्॥ **1.57.20** ॥

प्रत्याख्यातो वसिष्ठेन गतिमन्यां तपोधनाः।
गुरुपुत्रानृते सर्वान् नाहं पश्यामि काञ्चन॥ **1.57.21** ॥

इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः।
तस्मादनन्तरं सर्वे भवन्तो दैवतं मम॥ **1.57.22** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तपञ्चाशः सर्गः ॥